| | | |
|---|---|---|
| The ganges 9. | [1]भागीरथी [2]सुरसरि[3]द्विष्णुपदी [4]जाह्नवी तथा [5]गङ्गा । | |
| | [6]मन्दाकिनी [7]त्रिपथगा [8]सरिद्वरा [9]त्रिदशदीर्घिका प्रोक्ता ॥६७३॥ | |
| The river Godawari 2. | [1]गोदावरी च [2]गोदा [1]कालिन्दी [2]दिनकरात्मजा [3]यमुना । | The river Yamuna3. |
| The river Sone 2. | [1]शोणो [2]हिरण्यबाहु[1]र्मेकलकन्या च [2]नर्मदा [3]रेवा ॥६७४॥ | The river Narbada3. |
| A small pond 3. | [1]वेशन्तः [a][2]पल्वलं [3]तल्लं [1]कासारः [2]सरसी [3]सरः । | A large pond 3. |
| A natural pond 2. | [b][1]आखातो [2]देवखातः स्यात्[1]खाता [2]पुष्करिणी भवेत् ॥६७५॥ | An artificial pond2. |
| A pond 2. | [1]आधारश्च [2]तडागं स्या[1]दाली [2]पाली च कथ्यते । | A bridge 2. |
| A moat, a ditch 2. | [1]परिखा [2]दीर्घिका प्रोक्ता खाता या परितः पुरम् ॥६७६॥ | |
| A drain 2. | [1]परीवाहो [2]जलोच्छ्वास [1]उत्सः [c][2]प्रस्रवणं स्मृतम् । | A spring 2. |
| Drop. | [1]विप्रुषो [2]विन्दवः प्रोक्ताः [3]पृषतः [4]पृषतास्तथा ॥६७७॥ | |
| Liquidated food; also mud 2. Mud, mire 6. | [1]पिच्छिलं स्या[d][2]द्विजपिलं [1]पङ्कः [2]शादो [3]निषद्वरः । | |
| | [4]जम्बालः [5]कर्दमः प्रोक्तो बुधै[e][6]रिचिकिलस्तथा ॥६७८॥ | |
| | [1]सहस्रपत्रं [2]शत्रपत्र[3]मम्बुजं । | |
| | [4]कुशेशयं [5]तामरसं [6]सरोरुहम् । | |
| A lotus 17. | [f][7]विसप्रसूनं [8]कमलं [9]महोत्पलं , | |
| | [10]सरोज[11]मब्जं [12]नलिनं च [13]पुष्करम् ॥६७९॥ | |
| | [14]राजीव[15]मरविन्दं च [16]पद्मं [17]पङ्कजमिष्यते । | |
| Red lotus. | रक्तं [1]कोकनदं प्रोक्तं [1]पुण्डरीकं [2]सिताम्बुजम् ॥६८०॥ | A white lotus 2. |
| The white water lily 2. | [1]सौगन्धिकं च [2]कह्लारं स्या[1]दिन्दीवर[2]मुत्पलम् । | A blue lotus 4. |
| | [3]नीलोत्पलं [4]कुवलयं [1]कैरवं [2]कुमुदं विदुः ॥६८१॥ | White lotus 2. |

a पल्वणं b अखातो c प्रवहणं d स्याद्विजवलं e बुधैरिचकिल f विसप्रसूतं ।